दशमः पाठः

# परिवारः लघु एव वरम्

तीव्रगति से बढ़ती हुई जनसंख्या देश की एक प्रमुख समस्या है। इस समस्या की वृद्धि के कारणों में निरक्षरता भी एक प्रमुख कारण है। शिक्षा का प्रचार–प्रसार कर, छोटे परिवार के महत्व को बताया जा सकता है। प्रस्तुत पाठ में सरल एवं हृदयस्पर्शी परिसंवादों के माध्यम से बड़े परिवार में आने वाली समस्याओं एवं कठिनाइयों को उद्घाटित करते हुए छोटे परिवार के महत्व को चित्रित किया गया है।



(ज्वरपीड़ितः मोहनः पर्यङ्के शयानोऽस्ति। तस्मिन्नेव कक्षे गृहिणी गृहकर्मणि संलग्ना अस्ति। मोहनस्य अष्टकन्याः द्वौ पुत्रौ च संति।)

मोहन : – अद्य मां भृशं शिरोवेदना बाधते। रात्रौ अपि न सुखेन शयितो अस्मि। राधिके गृहकार्यं परित्यज्य इत एव आगच्छ।

राधिका – त्वं वारं–वारं मां आह्वयसि, किमहं करोमि? आसन्नं हि दीपमालिकापर्व। गृहे दशरुप्यकाणि अपि न सन्ति। किं एवमेव मम जीवनं यास्यति। इति विचार्य विचार्य गहने तमसि निमग्नं मे मनः।

गोविन्दः– (प्रविश्य) पितृवर! अहं विद्यालयात् आगतोऽस्मि। श्वः अहं विद्यालयं न गमिष्यामि। मम हस्ते श्यामपट्टिका लेखनवर्तिका चापि नास्ति। एकं पुस्तकमपि न वर्तते पठनार्थम् अभ्यास–पुस्तिकानां तु का कथा।

विद्या – मम कक्षाध्यापिका मां प्रतिदिनं विद्यालयशुल्कपूर्तये भर्त्सयति। सर्वाः मम सहपाठिन्यः मामेव लक्षीकृत्य हसन्ति। सर्वाभिः छात्राभिः विद्यालयशुल्कं दत्तम्। मासान्ते कक्षापञ्जिकायाः मम नाम कर्तिष्यति।

कमला – मातः! प्रतिदिनमेव मह्यं कक्षाध्यापिका विषयाध्यापकाश्च विद्यालयगणवेशं धारयितुं कथयन्ति। अहं तु एकं मलिनं वस्त्रं परिधाय विद्यालयं यामि। प्रतिदिनमेव मे कक्षायाः बहिः निष्कासनं क्रियते। कक्षागवाक्षात् एव पाठ्यमानं विषयं अहं शृणोमि।

श्यामा – मातः! दशमी कक्षा तु मया उत्तीर्णा। न प्रेषयसि मां विद्यालयं साम्प्रतम्। गृहमेव उपविष्टा अहं किं करिष्यामि। देहि मे त्रिंशतरुप्यकाणि अहं सूचिकर्मणः प्रशिक्षणं प्राप्तुं प्रशिक्षणालयं यास्यामि।

गोपालः– पितः! देहि मे शतरुप्यकाणि मम भगिनी विद्या मह्यं द्वे क्रीडनके क्रेतुम् आपणं यास्यति।

निर्मला– पितः मम पार्श्वे चित्रकर्माभ्यासपुस्तिका नास्ति। देहि मे पञ्चविंशतिरुप्यकाणि अद्यैव तां क्रीत्वा अहं विषयाध्यापिकया दत्तं गृहकार्यं करिष्यामि।

राधिका– स्वामिन्! इयं मे पुत्री मनोरमा कियत्कालात् रुग्णा वर्तते। किञ्चिदपि न खादति, शयाना एव दिनं यापयति। चिकित्सायै आतुरालयं गन्तुं धन–व्यवस्था अपि नास्ति।

सीता – मम सख्युः रशीदायाः परिणयोत्सवः आसन्नो वर्तते। मम अन्याः सख्यः तु सहस्त्राणां रुप्यकानाम् अभिनवान् उपहारान् दास्यन्ति। दास्यामि किमहं तस्यै। द्विशतं रुप्यकानां व्यवस्थां विना कोऽपि उपहारः आपणात् न लप्स्यते।

कविता – मातः! जीर्णानि मे सर्वाणि वस्त्राणि। दीप–मालिकापर्वणि तु नववस्त्राणि परिधाय लक्ष्मीपूजनं करिष्यामि।

सीमा – पितः! नगरे सर्वत्र दीपमालिकापर्वणः शुभागमने अग्निक्रीडनकानां पटापटशब्दः श्रूयते। अस्माकं गृहं न शोधितं न धवलीकृतं। मम सखीभिः तु प्रभूतेन धनव्ययेन क्रीतानि अग्निक्रीडनकानि। इदानीं तु अहमपि पञ्चशतरुप्यकानाम् अग्निक्रीडनकानि क्रेतुम् इच्छामि।

मोहनः – न पश्यथ यूयं मम अवस्थाम्। ज्वरेण वेपते मे शरीरम्। एकतः रुग्णावस्था, अपरतः स्वार्थ–प्रेरिता यूयं सर्वे स्वमनोरथान् एव पश्यथ। सत्यमेवोच्यते– ''छिद्रेष्वनर्थाः बहुली भवन्ति।''

(मोहनस्य अभिन्नं मित्रम् अनिलः स्वभार्यया सह प्रविशति द्वे कन्ये महिमा, गरिमा चापि प्रविशतः। सर्वे अभिवादनं कुर्वन्ति।)

अनिलः– मित्रवर! नमस्ते! शुभं ते दीपोत्सवः भवतु। नगरे सर्वत्र दीप–महोत्सवस्य चाकचक्यं दृश्यते। त्वं कथं म्लानमुखः शयानोऽसि। अस्माकं भ्रातृजायापि कथं तूष्णीमुपविष्टा। अपि कुशलिनः भवन्तः?

मोहनः– मित्र! किं कथयामि ? शून्यमिव दृश्यते मे जगत्। मत्कृते तु जीवने न कोऽपि अभिलाषः। अहन्तु मरणमेव शरणं पश्यामि।

श्रुतिः– भ्रातृवर! अस्मिन् हर्षोल्लासमये कातरवचनानि ब्रुवाणः अस्माकं भगिनीं पुत्रान्, कन्यकाः च कथं दुःख–सागरे निमज्जयसि। संसारे दुःखानि सुखानि च चक्रवत् परिवर्तन्ते। आत्मबलं न त्याज्यम् आपत्स्वपि।

मोहनः– मित्र! परिवार एव मम दुःखस्य कारणम्। मम एषा पुत्री श्यामा विवाहयोग्या संजाता।

अनिलः– मित्रवर! न ते वचोऽभिनन्दामि। चिन्ता तु शिक्षादीक्षाकृते च करणीया। यदि अन्यथा न मन्यसे तर्हि वृहत् परिवारः एव युष्मदीयं दुःखकारणम्। वृत्या तु भवत्सदृशमेव अर्थोपार्जनं क्रियते मया।

श्रुतिः– भ्रातृवर! मम तु कन्ये पुत्रसमे एव स्तः। एका तु चिकित्साक्षेत्रे आयुर्वेद–पाठ्यक्रमे अध्ययनं करोति। अपरा संस्कृत स्नातकोत्तर–पाठ्यक्रमे पठति। आवां स्वस्थप्रसन्नौ स्व द्वे कन्यकेऽपि च। अस्माकं सदनं सानन्दम्।

राधिका– भगिनि! आवाभ्यां नियोजितपरिवारविषये कदापि न चिन्तितम्। अस्मिन् विषये पूर्वम् आवां न प्रेरितौ।

अनिलः – गतस्य शोचनं न करणीयम्। लघुपरिवारविषये अन्यान् प्रेरयन् स्वपरिवारम् अपि प्रकारान्तरेण प्रेरय। मत्सामर्थ्यानुसारेण अहं सहयोगाय तत्परः। इदानीम् अस्मान् गृहगमनाय आज्ञापयतु।

मोहनराधिके – गच्छतु भवान् पुनर्दर्शनाय।

(श्रुत्यनिलौ पुत्रीभ्यां सह स्वगृहं प्रति गच्छतः)

## शब्दार्थाः

| | | |
|---|---|---|
| पर्यङ्के | = | पलङ्ग पर |
| भृशं | = | बहुत |
| शिरोवेदना | = | सिरदर्द |
| इत एव | = | यहीं |
| आह्वयसि | = | बुलाते हो |
| आसन्नं | = | निकट |
| यास्यति | = | जायेगा, बीतेगा |
| गहनेतमसि | = | गहन अंधकार में। |
| श्यामपट्टिका | = | स्लेट/पट्टी |
| लेखनवर्तिका | = | पेंसिल |
| शुल्कपूर्तये | = | शुल्क पटाने के लिए |
| भर्त्सयति | = | डाँटते हैं |
| लक्षीकृत्य | = | लक्ष्य करके |
| कक्षापञ्जिकायाः | = | कक्षा के रजिस्टर में से |
| कर्तिष्यति | = | काटेंगे |
| परिधाय | = | पहनकर |
| यास्यामि | = | जाऊँगी |
| गवाक्षात् | = | खिड़की से |
| पाठ्यमान | = | पढ़ाये जा रहे |
| प्रेषयसि | = | तुम भेजते हो |
| उपविष्टा | = | बैठी हुई |
| सूचिकर्मणः | = | सिलाई के काम का |
| क्रीडनके | = | खिलौने |

| | | |
|---|---|---|
| आपणं | = | दुकान/ बाजार |
| चित्रकर्म | = | चित्रकार के काम की/चित्रकारी |
| क्रीत्वा | = | खरीदकर |
| कियत् | = | कितने |
| रुग्णा | = | बीमार |
| आतुरालयम् | = | अस्पताल |
| परिणयोत्सवः | = | विवाहोत्सव |
| जीर्णानि | = | फटे पुराने |
| अग्निक्रीडनकानाम् | = | पटाखों का |
| शोधितम् | = | साफ किया गया। |
| धवलीकृतम् | = | सफेदी दी गई। पोता गया |
| वेपते | = | काँप रहा है। |
| छिद्रेष्वनर्थाः बहुली भवन्ति | = | कमियों में बहुत अनर्थ होते है। |
| स्वमनोरथान् | = | अपनी इच्छाओं को |
| चाकचक्यम् | = | चकाचक, चकाचौंध |
| भ्रातृजाया | = | भाभी, भौजाई |
| परिवर्तन्ते | = | घूमते हैं |
| आपत्स्वपि | = | विपत्तियों में भी |
| खलु | = | निश्चित ही |
| अभिनन्दामि | = | सहमत हूँ |
| करणीया | = | करनी चाहिए |
| युष्मदीयम् | = | तुम्हारी |
| वृत्या | = | नौकरी से/ पेशे से |
| शोचनम् | = | शोक |
| प्रकारान्तरेण | = | अलग–अलग ढंग या माध्यम से |

## अभ्यासः

1. संस्कृतभाषया उत्तरत –

(क) मोहनः कया वेदनया पीडितः आसीत्?

(ख) किं पर्व आसन्नं वर्तते?

(ग) गोविन्दः केन कारणेन विद्यालयं गन्तुं न इच्छति?
(घ) का सूचिकर्मणः प्रशिक्षणं प्राप्तुं वाञ्छति?
(ङ) गोपालः किमर्थं रुप्यकाणि याचते?
(च) दीपमालिकापर्वणि कस्य शब्दः श्रूयते?
(छ) संसारे कानि–कानि चक्रवत् परिवर्तन्ते?
(ज) कीदृशः परिवारः एव वरम्?

## 2. अधोलिखितानां शब्दानां मूलशब्द–विभक्तिवचन–लिङ्गानि लिखत –

| | शब्दरुपम् | मूलशब्दः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| यथा– | विद्यालयात् | विद्यालय | पुल्लिंग | पञ्चमी | एक |
| 1. | पूर्तये | ——— | ——— | ——— | ——— |
| 2. | सर्वाभिः | ——— | ——— | ——— | ——— |
| 3. | कक्षायाः | ——— | ——— | ——— | ——— |
| 4. | मह्यम् | ——— | ——— | ——— | ——— |
| 5. | भार्यया | ——— | ——— | ——— | ——— |
| 6. | आवां | ——— | ——— | ——— | ——— |

## 3. अधोलिखितानां प्रश्नानामुत्तराणि लिखत–

1. 'क्त्वा और ल्यप्' का प्रयोग कर वाक्य बनाइये।
2. 'उपसर्ग और प्रत्यय' में अंतर उदाहरण सहित लिखिए–
3. 'तरप् एवं तमप्' प्रत्यय का प्रयोग कर सार्थक शब्द का निर्माण कीजिए।
4. सह,साकं, सार्धं, समं का प्रयोग कर वाक्य बनाइये।

## 4. निम्नांकितेषु तत्पुरुषसमासं चिनुत –

ज्वरपीडितः, शिरोवेदना, कक्षाध्यापिका, प्रतिदिनम्, विद्यालयगणवेशः, अभ्यासपुस्तिका, दीपमालिका, दीपोत्सवः।

**5. अधोलिखितेषु पदेषु कृदन्ततद्धित–शब्दान् पृथक् कुरुत –**

**शब्दाः** – गत्वा, मर्मज्ञः, प्रवक्ता लिखितः, पठितुम्, वात्सल्यम्, नष्टः, भवदीयः लघुतमः, पूजितः ।

| | | | | | |
|---|---|---|---|---|---|
| 1. | कृदन्ताः | ———— | ———— | ———— | ———— |
| | | ———— | ———— | ———— | ———— |
| 2. | तद्धिताः | ———— | ———— | ———— | ———— |
| | | ———— | ———— | ———— | ———— |

**6. अधोलिखितपदेषु संधिविच्छेदं कृत्वा नामानि लिखत –**

| | पदम् | संधि–विच्छेदः | नाम |
|---|---|---|---|
| (क) | महतीह | ———— | ———— |
| (ख) | शयानोऽस्ति | ———— | ———— |
| (ग) | तस्मिन्नेव | ———— | ———— |
| (छ) | छिद्रेष्वनर्थाः | ———— | ———— |
| (ङ) | तूष्णीमुपविष्टा | ———— | ———— |

————000———